H.S.E. (I)
February 2008

Reg. No. .....

Name .....

246

Part - III

SANSKRIT SASTHRA

Maximum : 80 Scores

Time : 2½ Hours
Cool off time : 15 Minutes

General Instructions to Candidates :

- There is a 'Cool off-time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool off time'.
- Use the 'cool off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.

നിർദ്ദേശങ്ങൾ:

- നിർദ്ദിഷ്ട സമയത്തിന് പുറമെ 15 മിനിറ്റ് 'കൂൾ ഓഫ് ടൈം ' ഉണ്ടായിരിക്കും. ഈ സമയത്ത് ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതാനോ, മറ്റുള്ളവരുമായി ആശയ വിനിമയം നടത്താനോ പാടില്ല.
- ഉത്തരങ്ങൾ എഴുതുന്നതിന് മുമ്പ് ചോദ്യങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിക്കണം.
- എല്ലാ ചോദ്യങ്ങൾക്കും ഉത്തരം എഴുതണം.
- ഒരു ചോദ്യനമ്പർ ഉത്തരമെഴുതാൻ തെരഞ്ഞെടുത്തു കഴിഞ്ഞാൽ ഉപചോദ്യങ്ങളും അതേ ചോദ്യ നമ്പരിൽ നിന്ന് തന്നെ തെരഞ്ഞെടുക്കേണ്ടതാണ്.

निर्देशा: -

सर्वे प्रश्ना: समाधेया: ।

प्रश्नान् सावधानं पठित्वा उत्तरं लिखत ।

तर्कसंग्रह:

1. तर्कसंग्रहस्य कर्ता क: ?
   (गौतम:, कणाद:, अन्नंभट्ट:) **(1)**

2. अधोनिर्दिष्टा: केषु द्रव्येषु अन्तर्भवन्ति इति पट्टिकां कुरुत ।
   पाषाण:, वह्नि:, जीव:, सुवर्णम्, प्राण:, प्राची, मृत्, ईश्वर: । **(6)**

3. यथोचितं योजयत ।

(अ)	(आ)	(इ)
घ्राणः	गुणः	त्वगिन्द्रियमात्रग्राह्यः
मनः	नासाग्रवर्तिः	असाधारणम्
स्पर्शः	इन्द्रियम्	परमाणुरूपम्
करणम्	परामर्शजन्यं	ज्ञानम्
अनुमितिः	सुखाद्युपलब्धिसाधनम्	कारणम्

(5)

4. पृथिव्याः लक्षणं किम् ? **(1)**

5. 'शिलापलं जलसम्बन्धवत्' परार्थानुमानेन साधयत ।

अथवा

पञ्चावयवाः के ? सोदाहरणं विशदयत । **(5)**

6. 'दिल्लीतः काश्मीरः दूरे वर्तते' परत्वापरत्वे विवेचयत । **(2)**

7. 'जलेन दहति' इति वाक्यम् अप्रमाणम् - कस्मात् ? **(1)**

8. 'गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्'
अत्र हेतौ दोषो अस्ति वा न वा इति विचारयत । **(5)**

9. अधोनिर्दिष्टेभ्यः मूर्तद्रव्याणि कानि ?
पृथिवी, कालः, आकाशः, आपः, मनः, वायुः, दिक्, आत्मा । **(2)**

10. अधः प्रदत्तान्यधिकृत्य लघुटिप्पणीं लिखत ।

1. वायुः 2. रसः 3. मनः **(6)**

11. सीता घटं पश्यति । घटे नीलरूपं अस्तीति जानाति । किञ्चित्समयानन्तरं भूतले घटो नास्ति इति निश्चीयते । एषु उदाहरणेषु कः कः सन्निकर्षः संजातः इति प्रतिपादयत । **(3)**

12. 'दण्डेन ताडयति' - अत्र करणं किम् ? **(1)**

13. सूचना: - पठित्वा कस्य कस्य लक्षणमिति विविच्य लिखत ।

(1) नित्यज्ञानवान् सर्वज्ञः ।

(2) चक्षुर्मात्रग्राह्यः गुणः । **(2)**

व्याकरणम् ।

1. अक्षराण्युपयुज्य प्रत्याहारलेखनाय नियुक्तः छात्रः अधः प्रदत्तरूपेण प्रत्याहारान् लिखितवान् । तेषां साधुतां परीक्षताम् ।

(क) ज ब ड द - जश्

(ख) अ इ उ ऋ - अण्

(ग) ह य व र ल - यण् **(3)**

2. यथोचितं योजयत ।

(अ)	(आ)	(इ)
स्वरितम्	विरामोऽवसानम्	परसवर्णः
तल्लयः	समाहारः स्वरितः	वर्णानामभावः
अवसानम्	तोर्लि	उदात्तमनुदात्तं च

(3)

3. अधः प्रदत्तयोः सूत्रयोः संज्ञाविधायकत्वे किं प्रयोजनम् इति सोदाहरणं समर्थयत ।

(क) अलोऽन्त्यात्पूर्व उपधा ।

(ख) सुप्तिङन्तं पदम् । **(6)**

4. अधोनिर्दिष्टेषु सूत्रेषु संज्ञासूत्राणि विवेचयतु ।

वृद्धिरेचि, आद्गुणः, वृद्धिरादैच्, ष्टुना ष्टुः, अदेङ्गुणः, हलोऽनन्तराः संयोगः, एकवचनं सम्बुद्धिः । **(4)**

5. उचितस्य सूत्रस्य साहाय्येन पदानि सन्धत्त ।

(1) शिवस् + वन्द्यः - शिवर् वन्द्यः .....

(2) शिवर् + वन्द्यः - शिव उ वन्द्यः .....

(3) शिव उ + वन्द्यः - शिवो वन्द्यः ..... **(3)**

6. अधः प्रदत्तान्यक्षराणि उद्धृत्य समुचितेषु वलयेषु लिखतु, परिभाषां च यथास्थानं योजयत ।

औ, र, स, ओ, ष, ल, थ, न, ठ, व, ण ।

(मूर्धन्यः) (कण्ठोष्ठम्) (दन्त्यः) (दन्तोष्ठम्)

परिभाषा ..... **(4)**

7. 'भो देवाः' इत्यस्य सन्धिनिष्पत्तिः सूत्रसाहाय्येन समर्थयितुं निर्दिष्टेन छात्रेण अधः प्रदत्तरीत्या तल्लिखितम् । स्खालित्यमस्ति चेत् तत् शोधयतु ।

भोस् देवाः - भोर, देवाः (भो भगो अघोऽपूर्वस्य योऽशि)

भोर, देवाः - भोय् देवाः (हलि सर्वेषाम्)

भोय् देवाः - भो देवाः (ससजुषोरूः) **(3)**

8. 'कृष्णेषु' इति कृष्णशब्दस्य सप्तमीबहुवचनान्तरूपं निष्पादयत । सप्तमीबहुवचनप्रत्ययम् - सुप् । **(2)**

9. 'हे हरे' इति हरिशब्दस्य सम्बोधनप्रथमा एकवचन रूपनिष्पादने एवं हरिषु इति सप्तमी बहुवचन रूपनिष्पादने च रिक्तांशान् पूरयतु ।

(1) हे हरि + सु स्वौजसमौट्

हे हरि + स् .....

हे हरे + स् .....

हे हरे .....

(2) हरि + सुप् .....

हरि + सु - हलन्त्यम्

हरिषु ..... **(5)**

10. सखि शब्दस्य षष्ठी एकवचनरूपनिष्पत्तिः एकेन छात्रेण एवमुपन्यस्तम् । अत्रागतानि स्खालित्यानि निवारयतु ।

सखि + ङस्	-	स्वौजसमौट्
सखि + अस्	-	इको यणचि
सख्यस्	-	लशकतद्धिते
सख्युस्	-	ससजुषोरूः
सख्युर्	-	ख्यत्यात्परस्य
सख्युः	-	खरवसानयोर्विसर्जनीयः । **(3)**

11. रामाः - सर्वे - अत्र प्रथमा बहुवचनरूपे अनयोः भेदः अस्ति । तस्य कारणं सूत्रसाहाय्येन व्यवस्थापयतु । **(4)**